
## अष्टमः पाठः

# यक्षप्रश्नाः

(महाभारतस्य यक्षप्रश्नाः अत्यन्तं प्रसिद्धाः सन्ति। वनपर्वकथानुसारं वनवासकाले एकदा पाण्डवाः वने विचरन्तः आसन्। मार्गे द्रौपदी जलम् अयाचत। प्रथमं सहदेवः पात्रं नीत्वा जलम् आनेतुं समीपवर्तिनम् एकं तडागम् अगच्छत्। परं न प्रत्यागच्छत्। एवं क्रमेण नकुलार्जुनभीमाः अगच्छन्, परं तेऽपि न प्रत्यागच्छन्। अन्ते स्वयं युधिष्ठिरः तत्रागत्य अपश्यत् यत् मे चत्वारः अनुजाः भूमौ निष्प्राणाः पतिताः। सः तत्कारणं ज्ञातुम् ऐच्छत् सहसा एकः विशालकायः यक्षः आगच्छत्। तेनोक्तं यत् "मम प्रश्नोत्तरं विना यदि त्वं जलं गृहणासि तर्हि त्वमपि एवमेव निष्प्राणतां प्राप्स्यसि। अनन्तरं यक्षः प्रश्नान् अकरोत्। युधिष्ठिरस्य उत्तरैः सन्तुष्टः अनुजेभ्यः जीवनदानेन सहैव जलम् अपि अददात्।)



**यक्ष उवाच** — केनस्विच्छ्रोत्रियो भवति केनस्विद्विन्दते महत्?
केन द्वितीयवान्भवति राजन्! केन च बुद्धिमान्?

**युधिष्ठिर उवाच** — श्रुतेन श्रोत्रियो भवति, तपसा विन्दते महत्।
धृत्या द्वितीयवान्भवति, बुद्धिमान्वृद्धसेवया॥

**यक्ष उवाच** — किंस्विद् गुरुतरं भूमेः किंस्विदुच्चतरं च खात्।
किंस्विच्छीघ्रतरं वायोः किंस्विद् बहुतरं तृणात्॥

**युधिष्ठिर उवाच** — माता गुरुतरा भूमेः खात्पितोच्चतरस्तथा।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात्॥

**यक्ष उवाच** — किंस्वित्प्रवसतो मित्रं किंस्विन्मित्रं गृहे सतः।
आतुरस्य च किं मित्रं किंस्विन्मित्रं मरिष्यतः॥

**युधिष्ठिर उवाच** — सार्थः प्रवसतो मित्रं भार्या मित्रं गृहे सतः।
आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः॥

(युधिष्ठिरस्य उत्तरेण सन्तुष्टः यक्षः अवदत्)

**यक्ष उवाच** — भो राजन्! त्वं भ्रातृषु यम् एकम् इच्छसि सः जीवेत्।

**युधिष्ठिर उवाच** — नकुलो जीवेत् इति ममेच्छा अस्ति।

**यक्ष उवाच** — प्रियस्ते भीमसेनोऽयमर्जुनो वः परायणम्।
तत् कस्मान्नकुलं राजन् सापत्नं जीवमिच्छसि॥

**युधिष्ठिर उवाच** — यथा कुन्ती तथा माद्री विशेषो नास्ति मे तयोः।
मातृभ्यां सममिच्छामि नकुलो यक्ष जीवतु॥

युधिष्ठिरस्य निष्पक्षतया धर्मनिष्ठया च प्रसन्नः यक्षः सर्वेभ्यः जीवनं दत्तवान्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| विन्दते | — लाभ प्राप्त करता है | गृहे सतः | — घर में रहने वाले का |
| किंस्विद् | — क्या | आतुरस्य | — बीमार का |
| उच्चतरम् | — अधिक ऊँचा | मरिष्यतः | — मरने वाले का |
| खात् | — आकाश से | सार्थः | — धनयुक्त/अर्थसहित |
| शीघ्रतरम् | — अधिक गतिशील, तेज | भिषग् | — वैद्य |
| वातात् | — वायु से | वः | — तुम सब का |
| बहुतरम् | — बहुत फैलने वाली | परायणम् | — अनन्य भक्त |
| तृणात् | — तिनके से | सापत्नम् | — सौतले भाई (नकुल) को |
| प्रवसतः | — विदेश में रहने वाले का | साम्प्रतम् | — इस समय, श्रोत्रियो—ज्ञान |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत—**

क. भूमेः गुरुतरा का?

ख. खात् उच्चतरः कः?

ग. वातात् शीघ्रतरं किम्?

घ. प्रवसतः किं मित्रम्?

ङ. आतुरस्य मित्रं किम्?

2. **एकवाक्येन उत्तरं लिखत—**

क. का तृणात् बहुतरी?
ख. गृहे सतः किं मित्रम्?
ग. युधिष्ठिरस्य मातुः नाम किम्?
घ. मरिष्यतः मित्रं किम्?
ङ. नकुलस्य मातुः नाम किम्?
च. प्रसन्नो भूत्वा यक्षः किम् अकरोत्?

3. **कोष्ठकप्रदत्तैः शब्दैः सह उचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत—**

क. चिन्ता ................ बहुतरी भवति। (तृण)
ख. माता ................ गुरुतरा अस्ति। (भूमि)
ग. वायोः ................. शीघ्रतरं भवति। (मन)
घ. भार्या मम गृहे सतः ................. भवति। (मित्र)
ङ. ............ भिषग् मित्रं भवति। (आतुर)

4. **युग्मनिर्माणं कुरुत—**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | माता गुरुतरा | — | भार्या |
| ख. | वातात् शीघ्रतरम् | — | चिन्ता |
| ग. | गृहे मित्रम् | — | भूमेः |
| घ. | तृणात् बहुतरी | — | मनः |
| ङ. | मरिष्यतः मित्रम् | — | सार्थः |
| च. | प्रवसतो मित्रम् | — | दानम् |

5. **उदाहरणानुसारं निम्नलिखितपदानां समानार्थकपदानि लिखत—**

यथा — खात् — आकाशात्

भूमेः — ......................।
वातात् — ......................।
आतुरस्य — ......................।
तृणात् — ......................।
भ्रातॄणाम् — ......................।
मातृभ्याम् — ......................।

**योग्यताविस्तारः —**

- महाभारते वर्णिताः कौरवपाण्डवयोः अन्याः शिक्षाप्रदाः कथाः अन्वेषयत पठत च।
- महाभारतस्य अन्याभ्यः कथाभ्यः सूक्तीनां चयनं कुरुत पठत च।

*अतः परीक्ष्य कर्त्तव्यम्।*